**कलासु पूर्णा सकलासु पूर्णा**
**प्रयोगपूर्णा fपि च योगपूर्णा।**
**वाण्यापगा संस्कृतवर्णपूर्णा**
**तनोतु नो शं शिवकेशवेशी।।**

अन्वयः -कलासु पूर्णा सकलासु पूर्णा प्रयोगपूर्णा अपि च योगपूर्णा संस्कृतपूर्णवर्णा (सा) शिवकेशवेशी वाण्यापगा नः शं तनोतु।।

संस्कृतपक्षे अयमाशयः - कलासु चतुःषष्टिकलासु पूर्णा। अस्यामेव भाषायां चतुःषष्टि कलाः पूर्णतां प्राप्ताः। तासु कलासु एषा खलु भाषा पूर्णा पूर्णरूपत्वेन वर्तते। न केवलं चतुःषष्टि कलासु अपि तु सकलासु पूर्णा सकलासु विद्यासु अपि पूर्णातां प्राप्ता सैषा भाषा। पुनरपि भाषायाः पूर्णतां वर्णयति प्रयोगपूर्णेति। प्रयोगेन पूर्णा प्रयोगपूर्णा। व्याकरणप्रयोगेन पूर्णा । अपि च योगपूर्णा योगेन तन्नामकेन दर्शनेन पूर्णा। अथवा योगः कर्मसु कौशलमिति गीतावचनानुसारं कर्मकौशलेन च पूर्णा। अथवाविविधभाषायोगे अपि पूर्णा।

पुनःकीदृशीं पूर्णतां प्राप्ता संस्कृतभाभाषा इति आकांक्षायां वदति- संस्कृतवर्णपूर्णा संस्कृतैः वर्णैःपूर्णा ।

पूर्णतायां किं पुनः इति चेत् उच्यते। शिवकेशवेशी । शिवश्च केशवश्च शिवकेशवौ तयोः ईशी नियन्त्री शिवकेशवेशी नादरूपेण(प्रणवस्वरूपेण) तावीशतीत्यतः शिवकेशवेशी इयं भाषा। सा वाण्यापगा वागात्मिका नदी नःशं तनोतु कुर्यादित्यर्थः।

गङ्गापक्षे तु -कलासु पूर्णा षोडशकलासु पूर्णा तस्याःशक्त्यात्मकत्वात्। षोडशकलावती खलु शैवी शक्तिः। सकलासु पूर्णा सकलासु नदीषु पूर्णा । तथा च उक्ति नदीषु गङ्गा नगरेषु काञ्चीति। प्रयोगपूर्णा। प्रकृष्टो योगः प्रयोगः । दुष्टानामपि गङ्गास्नानेन संवर्गलोकसंयोगकरणात् अत्र प्रकर्षत्वमस्याः। एतादृशप्रयोगेन पूर्णा गङ्गानदी। योगपूर्णा इतराभिः नदीभिः सह योगेन पूर्णा। ( त्रिवेणीसङ्गमः अत्र सूच्यते)। अथवा सज्जनानां योगेन पूर्णा। पुनः कीदृशी गङ्गा - संस्कृतवर्णपूर्णा संस्कृतैः वर्णैः जातकर्मोपनयनादि षोडशसंस्कारैः संस्कृताः वर्णाः। तैः ब्राह्मणक्षत्रियवैश्यशूद्रादिभिः वर्णैः पूर्णा। गङ्गाप्रान्ते तेषां विद्यमानत्वात्। अथवा संस्कृतैः आराधनार्थं सम्यग् कृतैः वर्णैः रक्तहरितादिभिः पूर्णा व्याप्ता खलु गङ्गा। पुनः कीदृशी सा इति चेत् शिवकेशवेशी शक्त्यात्मकत्वात् परमेश्वरस्य नारायणस्य च नियन्त्री सा वाण्यापगा (वागात्मिका गङ्गा) नः शं तनोतु शान्तिं विदध्यात्।

अस्मिन् श्लोके शिवकेशवेशीति पदेन श्लोककर्तुः शङ्करनारायणेति नाम अपि अन्यथा सूचितम्।

वृत्तम् उपजातिः तल्लक्षणं तु - अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयादुपजातयस्तः।। इति ।